Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 4 | ISSN : 2581- 6306

# जीवन्धरचम्पूकाव्ये मुख्यो रसः

डा. जे.बलिचक्रवर्ती
उपाचार्यः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यलयः,तिरुपतिः

**Article Info**
Volume 5, Issue 4
Page Number : 126-130
**Publication Issue :**
July-August 2022
**Article History**
Accepted : 01 July 2022
Published : 20 July 2022

**सारांशः** – रस्यते आस्वाद्यते इति रसः। रसशब्दस्य बहवः अर्थाः निघण्टुषु दृश्यन्ते। तथाहि हेमकोशग्रन्थे रसस्यास्य अष्टादशार्थाः प्रस्तुताः। एतेषु अर्थेषु तिक्तादिरसः, जलम् इत्यादीनि साक्षात् रसनेन्द्रियेण आस्वाद्यानि भवन्ति। आत्मा, प्रेम इति द्वयं मनसा आस्वाद्यम्। मनः अपि इन्द्रियमेव। इन्द्रियास्वाद्यत्वं रसस्य प्रथमं लक्षणम्। किन्तु एतद् लौकिकविषयकं रसलक्षणम्। परमात्मा पुनः न इन्द्रियलभ्यः। आदौ उपनिषत्सु रसशब्दः आत्मपर्यायतया प्रयुक्तः। रसो वै सः। रसं हि एवायं लब्धानन्दी भवतीति तैत्तीरीयोपनिषदि उक्तम्। अतो रसः इत्येव आनन्दसाधनम्। आनन्दः एव ब्रह्म। सोऽपि आनन्दः लौकिकानन्दात् अर्बुदाधिकगुणिकः अनन्तश्च। अतः मया **जीवन्धरचम्पूकाव्ये मुख्यो रसः** इति शीर्षकमाश्रित्य लेखोऽयं प्रारब्धः।

**विशेषशब्दाः** – रसः, भक्तिज्ञानम्, शान्तः मुख्यो रसः, जीवन्धरचम्पूकाव्ये, यशोधरः, नागकुमारः, श्रीपादादयः इत्यादयः।

महाकवयः स्वकविता शक्तिं सार्थकीं कर्तुं यशश्च चिरं स्थापयितुं सहृदयप्रीतये सामाजिकानां आह्लादाय च काव्यरचनायां प्रवर्तन्ते। स एव इतिवृत्तमुत्पाद्य काव्यानि निर्मातुं समर्थाः अपि कवयः इहपरसाधकमितिवृत्तं स्वीकुर्वन्ति।

भारतदेशे वाल्मीकेरारभ्य कवयः महापुरुषवर्णनं कर्तुं धर्मप्रचारं विधातुं महापुरुषजीवितमधिकृत्य काव्यानि रचितवन्तः। भारतं च नानाधर्माणाम् आस्पदम्। वैदिकमतावलम्बिनः वाल्मीकिव्यासकालिदासप्रभृतयः तन्मतोद्धारकान् नायकान् वर्णयितुं तेषां जीवनवृत्तमेव काव्यं कृतवन्तः। एवं बौद्धधर्मावलम्बिनः कवयोपि बुद्धं नायकं कृत्वा बौद्धधर्मान् काव्यरचनेन विस्तारयामासुः। भारतदेशे बौद्धमतानन्तरं जैनमपि व्याप्तमासीत्। बौद्धवाङ्मये अश्वघोषस्य बुद्धचरितं, सौन्दरनन्दं इत्यादीनि काव्यानि प्रसिद्धानि। जैनधर्मेपि त्रिषष्ठिशलाकपुराणानि धर्मप्रचारकानि प्रसिद्धानि एवं तीर्थङ्कराणामपि चरितानि काव्यरूपेण प्रसिद्धान्येव। जैनधर्मावलम्बिनः नायकाः अपि काव्येषु स्वीकृताः ते च नायकाः लौकिक जीवनेपि प्रवृत्ताः। पाक्षिकचरित्रांशैः युवतान्यपि काव्यानि कथाकोशादीनि आश्रित्य प्रवृत्तानि एवं जैनवाङ्मये चत्वारः शाखाः, पुराणानि, तीर्थङ्कर चरितानि, धर्मप्रचारक महापुरुषविषयककाव्यानि, पाक्षिकचरित्रकांशा आश्रितानि च। तृतीयवर्गे वराङ्गः जीवन्धरः यशोधरः, नागकुमारः, श्रीपादादयः प्रसिद्धाः। एवं विधेषु काव्येषु जीवन्धरचरितचमपूकाव्यम् सर्वमहाकाव्यलक्षणसम्पन्नं वर्तते –

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**एको रसोऽङ्गी कर्तव्य: वीर: शृङ्गार एव वा।**

**अङ्गमन्ये रसा: सर्वे ....................॥[1] इति॥**

काव्यरसनिर्माणे भरतेन य: सिद्धान्त: कृत: स दृश्यकाव्यमात्र विषयोपि कालिदासादारभ्य सर्वे महाकविभि: तदेव लक्षणम् अनुसृतम्। आनन्दवर्धन: भरतोक्त सरणिम् अनुसृत्य भरतमताविरुद्धं नवमं शान्तरसं अङ्गीकृत्य महाभारते शान्त: प्रबन्धो व्यङ्ग्य: इति सिद्धान्तितवान्। मम्मटभट्ट: ध्वनिकारेणाङ्गीकृतं नवमं शान्तरसं स्थापयितुं निर्वेदस्य स्थायित्वं स्थापितवान्।

**रत्यादय: स्थायिभावा: स्युर्भूयिष्ट विभावजा:।**

**स्तोकं विभावैरुत्पन्ना: त एव व्यभिचारिण:॥[2]**

इति भरतोक्तं लक्षणमनुसृत्य निर्वेद: स्थायिभावोऽस्ति शान्तोपि नवमो रस: इति नवमं शान्तरसं स्थापितवान्।

**यथा यथा विपर्येति लोकतन्त्रमसारवत्।**

**तथा तथा विरागोऽत्र जायते नात्रसंशय:॥[3] इति॥**

व्यासवचनमनुसृत्यैव महाभारते शान्त: मुख्यो रस: इति शान्तस्य प्रबन्धव्यङ्ग्यत्वं निरूपितवान्। शान्तस्य प्रबन्धव्यङ्ग्यत्वेपि महाभारते सर्वत्र वासुदेवस्य प्रशंसा दृष्टैव। तदुक्तुम् –

**भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातन:।**

**सहि सत्यमृतं चैव पवित्रं पुण्यमेव च॥**

**शाश्वतं परमं ब्रह्म ध्रुवं ज्योति: सनातनम्।**

**यस्य दिव्यानि कर्माणि कथयन्ति मनीषिण:॥[4] इति**

आदि पर्वाणि महाभारते विष्णुमहिम्न: वर्णनस्य प्राधान्यं उपवर्णितम्। वासुदेवे भक्ति: आनन्दवर्धनकाले भावरूपेण अङ्गीकृतापि अनन्तरवर्तिभि: भक्तेरपि रसत्वं प्रतिपादितम्।

कविसमयमनुसृत्य वीरशृङ्गारयो: अन्यतरस्य मुख्यरसरूपेण ग्राह्यत्वेपि रसान्तरप्रधानानि काव्यान्यपि कालान्तरे आविर्भूतानि। भवभूते: उत्तररामचरितं करुणरसात्मकमिति केचिद्वदन्ति कृष्णमिश्रस्य प्रबोधचन्द्रोदयनाटकं शान्तरसप्रधानमङ्गीकुर्वन्ति। एवं रसान्तराणामपि प्राधान्यं कविसम्प्रदायसिद्धं वर्तते।

भक्तिज्ञानवैराग्याणि समेतानि पृथक्भूतानि वा मोक्षकारणानि भवन्त्येवेति आस्तिकानां विश्वास:। समेतत्वे तेष्वन्यतर: द्वितीयस्य सहकृत्वा भवति। भक्ति: ज्ञानाय कल्पते, ज्ञानेन भक्तिरूत्पद्यते वैराग्यं इतरद्वयस्य कारणं भवतीति तेषामन्योन्याश्रयत्वं सिद्धमेव। एवं त्रयाणां समेतत्वेपि यस्य विशेषप्राधान्यं त्रिषु दृष्टं तदा प्राधान्येन व्यपदेशा: भवन्ति इति लोकरीतिमङ्गीकृत्य तत् तत् रसप्रामुख्यव्यवहार: न्याय्य एव।

महाभारते एव जीवन्धरचम्पूकाव्येपि शान्त: एव मुख्योरस:। युधिष्ठिर: इव जीवन्धरोपि बाल: एव हतपितृक: बभूव। आप्ततमोपि काष्ठाङ्गार: दुर्योधन: इव तं सदा हन्तुं कृतोद्यम:। तथापि दैवलीलया जीवन्धर: सततं रक्षितोऽभूत्।

---

1 दशरूपकम्– 3/33 श्लोक:

2 रसगङ्गाधर:– प्रथमाननम् – पृ.सं.– 160

3 महाभारतम् – शान्तिपर्वाणि– मोक्षधर्मपर्व– 168/4 श्लोक:

4 महाभारतम्– आदिपर्व– 1/256, 257 श्लोक:

महाभारते इव जीवन्धरचम्पूकाव्येऽपि पौनः पुण्येन धर्मबोधः वैराग्यस्य उत्तमत्वमपि वर्णितम्। महाभारते श्रीकृष्णः इव जीवन्धरचम्पूकाव्ये महावीरस्य जिनदेवस्य महिमा बहुधा वर्णिता। द्वितीयलम्भे आचार्यः नन्दिः जीवन्धरं जैनधर्मान् अध्यापयामास। जीवन्धरस्य पितुः सत्यन्धरस्य विषयेपि काव्ये वैराग्यचिह्नानि वर्णितानि। किन्तु तत्र शान्तः वीररसाङ्गभूतः आसीदिति सत्यन्धरः न वैराग्यपात्रमभूत्।

काष्ठाङ्गारं आततायिनं आत्मानं हन्तुमागतं विज्ञाय सत्यन्धरः ऐश्वर्यमनुशुशोच। तदा विजयामाश्वासयन् सत्यन्धरोक्तानि वाक्यानि शान्तरसस्य पोषकाणि भवन्त्येव।

**प्राबोधयच्च पृथ्वीशः कथंचिल्लब्धचेतनाम्।**
**देवीं ज्ञानं हि दुःखाब्धितरणे तरणीयते॥**
**शम्पानिभासंपदिदं शरीरं चलं प्रभूत्वं जलबुद्बुदाभम्।**
**तारुण्यमारण्यसरित्सकाशं क्षयिष्णुनाशो हि न शोचनीयः॥**
**संयुक्त्योर्वियोगो हि संध्याचन्द्रमसोरिव।**
**रक्तयोरपि दंपत्योर्भविता नियतेर्वशात्॥**
**बन्धुत्वं शत्रुभूयं च कल्पनाशील्पिनिर्मितम्।**
**अनादौ सति संसारे तद्द्वयं कस्य केन न॥**[5]

विशेषतः शम्पानिभा ------इति श्लोके जन्मनः सम्पदानञ्च अनित्यत्व ज्ञानेन वैराग्यस्य पराकाष्ठा इति शान्तोरसः। जीवन्धस्य आचार्योऽपि जीवन्धरं शान्तरसानुकूलं जिनधर्ममुक्तवान् गुरुरपि बहुधा अनुभूतसुखः भस्मरोगाक्रान्तः शरीरस्य अनित्यतां ज्ञात्वा विरक्तो बभूव इति वर्णनेन शान्तोरसः परिपुष्टः। रोगाक्रान्तः जैनीं दीक्षां अङ्गीकृतवान्।

**विद्याधराणां विनिवासलोके कालं नृपः कश्चिदजीगमद्यः।**
**कृत्येन नाम्नापि च लोकपालो विद्याधरोऽभूद्विबुधेश्वरोऽपि॥**[6]

एकदा महीपतिरयमुदयशिखरिशेखरं हरदश्च इव हर्यक्षसनमलङ्कुर्वन्, गगनजलधिजल नीलीपटलमिव वियद्वनविहरमाणस्तम्बेरममिव सुरलोकसमारोहणा-र्थमाकलितसोपाननीलोपलमिवकञ्चन जलधरं नीलमपि नयनेन पीतमातन्वन्। क्षीबाणां क्षितिपानामैश्वर्यं क्षणक्षीणमिति बोधयन्तमिव तत्क्षणमन्तर्हितमवलोक्य निजनन्दन-क्षिप्तराज्यभारो विज्रम्भितवैराग्यसाम्राज्यप्रतिष्ठामधितिष्ठन्, सकलसांसारिकदुःख-शमनदीक्षां जैनीं दीक्षामाससाद।

एवं शान्तरसबीजानि काव्यारम्भे एव दृष्टानि। जीवन्धरः जिनदेवस्य भक्तः आसीत्। षष्ठे लम्भे जीवन्धरस्य तीर्थयात्रापि विस्तरेण वर्णिता। वने चरन् यत्रार्थी जीवन्धरः महान्तं जीनदेवस्य विमानं (आलयं) दृष्टवान्। तत्रस्थाः बहवः तपस्विनः मिथ्या तपश्चरन्तः जीवन्धरेण दृष्टाः। तदा जीवन्धरः तान् ज्ञानिनः कर्तुं शाश्वतं मुक्तिमार्गमुपदिदेश।

**तस्मादिदं क्लिष्टतपो विहाय नैर्ग्रन्थ्यरूपं परमं भजेत।**
**यस्मिन्सदा सन्निहिता जिनाङ्घ्रिभक्त्यान्विते शाश्वतमुक्तिलक्ष्मीः॥**[7]

---

5 जीवन्धरचम्पूकाव्यम् - 1/77-80 श्लोकाः

6 जीवन्धरचम्पूकाव्यम् - 2/5 श्लोक वचनं च, पृ. सं.- 40

7 जीवन्धरचम्पूकाव्यम् - 6/13 श्लोकः

तत्रस्था: तपस्विन: जिनदेवस्य दर्शनात् जीवन्धरं वारयामासु:। बद्धकवाटमालयं दृष्ट्वा जीवन्धर: स्वयं बहुधा भगवन्तं स्तुतवान्। स्तुत्या प्रीत: देव: आलयमुद्घाटितद्वारम् अकरोत्। तस्मिन् स्तोत्रे दर्शन भाग्यप्राप्तौ च शान्तोरस: प्रतीयते।

एकादशे लम्भे अष्टौ स्नुषा: दृष्ट्वा अनुभूतसुखा देवी विजया जातवैराग्या तपसे वनं गता।

**नृपस्य जननी ततो निखिलशीलमालाखनिर्व्यरज्यत**
**-विशालधी: कुटिलसंसृतावेकदा।**
**अपश्यमिह पैतृकं पदममन्दकीर्तौ सुते**
**पराक्रमजिताहिते किमधुनेति सा जानती॥**
**अपारे घोरसंसारे विरक्तिर्विस्तृता हृदि।**
**दीक्षायै त्वरयत्यद्य मां शकेन्दुनिभानना:॥**[8]

एकादशलम्भे एव जीवन्धरस्वापि वैराग्यम् उपवर्णितम्। मातु: प्रव्रजनानन्तरं त्रिंशद्वर्षाणि जीवन्धर: राज्यंशशास।

**एवं सौख्येन वसत: पाकारिसदृशश्रिय:।**
**धराधिपस्य धीरस्य त्रिंशद्वर्षाण्ययासिषु:॥**[9]

अष्टाभ्य: पत्नीभ्य: अष्टौ सुता: जाता:। तदा वसन्ते पत्नी सहित: जीवन्धर: विहारार्थम् उद्यानवनं जगाम। तत्रैव तस्य वैराग्यकारणभूता घटना आसीत्। महान् वानरसमूह: उद्यानवनं प्रविष्ट:। तत्र कोपि वानर: स्वप्रियां वानरीं विहाय अन्यस्याम् असक्तोऽभूत्, तदा वानरी पत्यै कुपिता। वानर युवा तां बहुधा अनुनीयापि सान्त्वयितुं न शशाक। अशक्तश्च मूर्छित: मूर्छां गतं भर्तारं दृष्ट्वा वानरी भीता तस्य समीपम् आगत्य कथमपि वानरं लब्धचेतनमकरोत्। प्रीत: वानरोपि पक्वं पनसफलं वानर्यै दत्तवान् अत्रान्तरे वनपाल: दण्डमादाय तौ दम्पती तर्जयित्वा फलमपहृत्य नीतवान्। तम् वृत्तान्तं दृष्ट्वा जीवन्धरोपि आत्मन: राज्यनाशस्य स्मृत्वा जातवैराग्योऽभूत्। जीवन्धरराज्यकथया तत् वृत्तान्तस्य सादृश्यमपि एवं वर्णितम्।

**काष्टाङ्गारायते कीशो राज्यमेतत्फलायते।**
**मद्यते वनपालोऽयं त्याज्यं राज्यमिदं मया॥**[10]

अस्मिन् श्लोके सर्वा: क्रिया: आचार क्यङ् अन्ता: उपमानादाचारे.... इत्यनुवृत्तौ कर्तु: क्यङ् सलोपश्च इति प्रातिपदिकात् क्यङ् प्रत्यय:, ङित्वात् आत्मनेपदम् काष्टाङ्गार: इव आचरति, फलमिव आचरति इति सादृश्यमूह्यम्। एवं राज्यस्य अनित्यतां ज्ञात्वा राजापि विरक्त: पूर्वस्मिन् जन्मनि जीवन्धर: यशोधरनामक: राजा आसीदिति वैराग्यकारणं पश्चात् निरूपितम्।

राज्यादिकं सर्वमैश्वर्यं स्त्रिय: भोगाश्च सर्वे नश्वरा:। तज्जन्यं सुखं आकालिकं, समानकाले उत्पत्ति विनाशो यस्य स: आकालिक:। तस्मिन् सन्दर्भे शान्तरस वर्णनात्मका: पुत्रदशाधिका: श्लोका: वर्तन्ते। सर्वेषामुदाहरणं ग्रन्थविस्तरकारणं इति मुख्य: श्लोक: उदाह्रियते।

---

[8] जीवन्धरचम्पूकाव्यम् – 11/7–8 श्लोक:

[9] जीवन्धरचम्पूकाव्यम् – 11/15 श्लोक:

[10] जीवन्धरचम्पूकाव्यम् – 11/22 श्लोक:

**ममेयं मृद्वङ्गी मम तनय एष प्रचुरधी**

**-रिमे मे पूर्वार्था इति विगतबुद्धिर्नरपशुः।**

**अणुप्रख्ये सौख्ये विहितरुचिरारम्भवरागः**

**प्रयाति प्रायेण क्षितिधरनिभं दुःखमधिकम्॥**[11]

जगतः अनित्यत्व बोधकोऽयं श्लोकः वैराग्यसूचकः शान्तरसव्यञ्जकश्च तदुक्तमभियुक्तैः –

**सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः।**

**किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम्॥**[12]

एवं ज्ञात्वा राजा मुमुक्षुः पुत्रेषु राज्यं निक्षिप्य भार्यासहितः तपसे वनं गतः जिनोपासनेन मोक्षपदवीं प्राप्तवान् इति काव्यसमाप्त्या निर्वेदस्यैव स्थायित्व सिद्धेः जीवन्धरचम्पूकाव्ये शान्तः मुख्योरसः इति निश्चिनुमः। अस्य मतस्य उपोद्बलकः काव्यसमाप्तिश्लोको यथा –

**जीवन्धरोऽयं तपसि प्रवीणो यथाक्रमं नष्टघनाष्टकर्मा।**

**रत्नत्रयं पूर्णमवाप धीरो महामुनिर्मान्यगुणाभिरामः॥**[13]

**'रत्नत्रयं सम्यग्दर्शनरज्ञानचारित्रात्मकम्'** जैनदर्शने स एव मोक्षमार्गः।

**उपयुक्तग्रन्थसूची**


1. जीवन्धरचम्पूकाव्यम्, भारतीयज्ञानपीठकाशी, 1958
2. दशरूपकम्, चौखाम्बा संस्कृत सिरिज, वारणासी, 1972
3. ध्वन्यालोकः, मोतिलाल बनारसी दास, वारणासी,1952
4. महाभारतम्, Oriental Books Reprint Corporation, New Delhi, 1979
5. रसगङ्गाधरः, चौखाम्बा संस्कृतविद्यालय, वारणासी, 1987


[11] जीवन्धरचम्पूकाव्यम् – 11/27 श्लोकः

[12] ध्वन्यालोकः– तृतीयोद्योतः, लोचनम्– पृ. सं.– 685

[13] जीवन्धरचम्पूकाव्यम् – 11/57 श्लोकः